## एकविंशः पाठः

# सूक्तयः

सु-उक्तिः सूक्तिः भवति। अनुभवपूर्णं हितकारिवचनम् एव सूक्तिः। सूक्तयः मानवानां स्वभावं शोधयन्ति, सन्मार्गं दिशन्ति, आचारम् उपदिशन्ति च। अतः शिक्षणेऽपि बालानां कृते सूक्तयः महत्त्वपूर्णाः सन्ति। अत्र विभिन्नेभ्यः ग्रन्थेभ्यः सूक्तयः सङ्कलिताः।

1. मे मनः शिवसङ्कल्पमस्तु।
2. सत्यश्रमाभ्यां सकलार्थसिद्धिः।
3. सा विद्या या विमुक्तये।
4. योगः कर्मसु कौशलम्।
5. स्वाध्यायान्मा प्रमदः।
6. देवपितृकार्याभ्यां न प्रमदितव्यम्।
7. धर्मो रक्षति रक्षितः।
8. मन्त्रमूलाः सर्वारम्भाः।
9. आहारे व्यवहारे च त्यक्तलज्जः सुखी भवेत्।
10. सतां हि सन्देहपदेषु वस्तुषु प्रमाणमन्तः करणप्रवृत्तयः।
11. सकलं कष्टं निखिलं नष्टं यदि आचरणं मलिनं भ्रष्टम्।

### शब्दार्थः

| | | |
|---|---|---|
| सत्यश्रमाभ्याम् | – | सत्य और श्रम द्वारा |
| विमुक्तये | – | मुक्ति के लिये |
| कर्मसु | – | कर्म में |
| स्वाध्यायान् | – | अपने स्वाध्याय में |
| प्रमदितव्यम् | – | प्रमाद करना चाहिए |
| रक्षितः | – | रक्षा करने पर |
| मन्त्रमूला | – | मन्त्रणा पर आधारित |
| सर्वारम्भाः | – | सभी कार्यों का आरम्भ |
| अन्तःकरणम् | – | मन, बुद्धि आदि |
| आचरणम् | – | व्यवहार |
| देवपितृकार्याभ्याम् | – | देव और पितृ कार्यों में |

## अभ्यासः

### (1) एकपदेन उत्तरं लिखत –

(क) काभ्यां सकलार्थसिद्धिः ?

(ख) मे मनः कीदृशम् अस्तु ?

(ग) कर्मसु कौशलं किम् ?

(घ) प्रमादः कस्मात् न कर्त्तव्यः ?

(ङ) कः रक्षितः रक्षति ?

### (2) एकवाक्येन उत्तरं लिखत –

(क) मन्त्रमूलाः के?

(ख) नरः कथं सुखी भवति ?

(ग) सकलं कदा नष्टं भवति ?

### (3) अधोलिखितप्रश्नानाम् उत्तराणि लिखत –

(क) योगस्याशयं स्पष्टं करोतु ?

(ख) कुत्र कुत्र प्रमादः न कर्त्तव्यः ?

(ग) धर्मः कथं रक्षति ?

(घ) कीदृशी विद्या मुक्तिं ददाति ?

(ङ) भ्रष्टाचारेण किं किं भवति ?

### (4) उचितमेलनं कुरुत –

| | (अ) | (आ) |
|---|---|---|
| (क) | विद्या | योगः |
| (ख) | आहारे | रक्षति |
| (ग) | मन्त्रमूलाः | विमुक्तये |
| (घ) | कर्मसु कौशलम् | व्यवहारे |
| (ङ) | धर्मो रक्षितः | सर्वारम्भाः |

### (5) रेखाङ्कितशब्दान् आधृत्य प्रश्ननिर्माणं कुरुत –

(क) धर्मो <u>रक्षितः</u> रक्षति।

(ख) <u>भ्रष्टाचारेण</u> सर्वं नष्टं भवति।

(ग) विद्या <u>मुक्तिप्रदा</u> अस्ति।

### ( 6 ) रिक्तस्थानानि पूरयत –

(श) सा विद्या या . . . . . . . . . . . . . . ।

(ष) . . . . . . . . . . . . . . न प्रमदितव्यम्।

(स) आहारे व्यवहारे च . . . . . . . . . . . . . . सुखी भवेत्।

(ह) . . . . . . . . . . . . . . सकलार्थसिद्धिः।

### ( 7 ) सन्धिविच्छेदं कुरुत –

सर्वारम्भाः, धर्मो रक्षति, स्वाध्यायान्मा

### ( 8 ) कोष्ठकात् शब्दं चित्वा सूक्तिं रचयत –

धर्मो योगः यत्र सकलम्

**यथा** –

**धर्मो रक्षति रक्षितः**

### ( 9 ) सूक्त्या पूर्तिं करोतु –

| | | | | | | | | | | | |
|---|---|---|---|---|---|---|---|---|---|---|---|
| | | | | नः | शि | | | ङ्क | | म | |

### ( 10 ) अव्यैयः वाक्यानि रचयत –

यत्र , तत्र , हि , च

### ( 11 ) समानार्थकशब्दं लिखत –

लज्जा, कष्टं , स्वाध्याय

### योग्यताविस्तारः –

- सूक्तिविषये भवान् किं जानाति संक्षेपेण लिखत।
- पाठानुसारं पंच अन्याः सूक्तीः लिखत।

❖ ❖ ❖